# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर-२०१९

| | | |
|---|---|---|
| कक्षा -शास्त्रिद्वितीयवर्षम् (SEM-3) | प्रश्नपत्रम्-४<br>(O.E.- 2.3.3. OLD ) | गुणाः - ७० |
| विषयः - फलितज्यौतिषम् । | | समयः ८:०० तः ११:०० |
| दिनाङ्कः - १२/१०/२०१९ | सन्दर्भग्रन्थः-लघुपाराशरी, जातकालङ्कारः, भारतीयकुण्डलीविज्ञानम्, षट्पञ्चाशिका | |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितेभ्यः कयोश्चित् द्वयोः सान्वयं व्याख्यां करोतु । १०**

(१) यदि केन्द्रे त्रिकोणे वा निवसेतां तमोग्रहौ ।
नाथेनान्यतरणापि सम्बन्धाद्योगकारकौ ॥

(२) अष्टमं ह्यायुषः स्थानमष्टमादष्टमं च यत् ।
तयोपरि व्ययस्थानं मारकस्थानमुच्यते ॥

(३) जन्मकाले तु संप्राप्ते लग्नं निश्चित्यपण्डितैः ।
तस्मिन्काले खेचराणां चारं निश्चित्य योजयेत् ॥

**प्रश्नः २ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु । १०**

(१) भाग्ययोगः ।

(२) राजयोगस्य फलप्राप्तिः ।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितेभ्यः कयोश्चित् द्वयोः सान्वयं व्याख्यां करोतु । १०**

(१) सौम्ये विलग्ने यदि वाऽस्य वर्गे शीर्षोदये सिद्धिमुपैति कार्यम् ।
सतो विपर्यस्तमसिद्धिहेतुः कृच्छ्रेण संसिद्धकरं विमिश्रम् ॥

(२) स्थिरोदये स्थिरांशे वा वर्गोत्तमगतेऽपि वा
स्थितं तत्रैव तद्द्रव्यं स्वकीयेनैव चोरितम् ॥

(३) श्रोणीपुत्रेण युक्तः प्रथमसुरगुरुर्लग्नतः षष्ठपोऽयं
कामाधिक्यं नराणां जनयति नियतं पापदृष्टो विशेषात् ।
काव्ये स्वीयालयस्थे तदनु मिथुनगे कामवान् मानवःस्या-
न्मूर्तौ सप्तास्वसूनौ धनुषि च वृषभे चेत्पुमानल्पकामः ॥

**प्रश्नः ४ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु । १०**

(१) विवाहज्ञानम् ।

(२) नपुंसकयोगः ।

## तृतीयान्विति:

**प्रश्नः ५ अधोलिखितेभ्यः कयोश्चित् द्वयोः सान्वयं व्याख्यां करोतु । १०**

(१) शिवघ्नोऽब्दः खखाद्रीन्दुलवाख्यः खाग्निशेषितः ।
जन्मतिथ्यन्वितस्तत्र तिथावब्दप्रवेशनम् ॥

(२) मंत्रत्रिषड्लग्नभवर्क्षपुत्रा व्यया इनाद्वर्षपदस्वमोच्चे ।
त्रिभं त्रिभं लग्नमतः क्रमेण स्त्रीणां नृणां रात्रिदिने च तेषाम् ॥

(३) जन्मलग्नपतिरब्दलग्नपो मुंथहाधिप इतस्त्रिराशिपः ।
सूर्यराशिपतिरह्निचन्द्रभांधीश्वरो निशि विमृश्य पञ्चकम् ॥

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखत । १०**

(१) मुंथाविचारः ।

(२) हर्षबलविचारः ।

## संयुक्तान्विति:

**प्रश्नः ७ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु । १०**

(१) नित्यमार्गी ग्रहाः के ?

(२) त्रिकोणे के भावाः भवन्ति ?

(३) केन्द्रम् अर्थात् कः भावः ?

(४) भारतीयकुंडलीविज्ञानस्य लेखकः कः ?

(५) जन्मचक्रे कति भावाः भवन्ति ?

(६) हिबुकः अर्थात् कः भावः ?

(७) शुभग्रहाः के सन्ति ?

(८) उभयोदयराशयः के ?

(९) विषमराशयः के ?

(१०) चरराशिनां नामानि लिखत ?

(११) जातकालङ्कारस्य लेखकः कः ?

(१२) तनु–कस्य भावस्य संज्ञा ?

(१३) वाक् – कस्य भावस्य संज्ञा ?

(१४) पणफरे के के भावाः भवन्ति ?

(१५) रात्र्यन्धः शब्दस्य कोऽर्थः ?

----००००----